# Charaka Samhita Adhyaya 8 Jaatisutriya Adhyayay part 2

Prepared by
Dr. Shrikant Verma
Assistant Proffessor
(Samhita evam Siddhanta)

# Monthly regimen to be adopted during normal pregnancy

- परमतो निर्विकारमाप्प्यायय्यमानस्य गर्भस्य मासे मासे कर्मोपदेक्ष्यामः|
- प्रथमे मासे शङ्किता चेदगर्भमापन्ना क्षीरमनुपस्कृतं मात्रावच्छीतं काले काले पिबेत्, सात्म्यमेव च भोजनं सायं प्रातश्चभुञ्जीत;....
- द्वितीये मासे क्षीरमेव च मधुरौषधसिद्धं; ...
- तृतीये मासे क्षीरं मधुसर्पिर्भ्यामुपसंसृज्य;....
- चतुर्थे मासेक्षीरनवनीतमक्षमात्रमश्नीयात्; ...
- पञ्चमे मासे क्षीरसर्पिः;...
- षष्ठे मासे क्षीरसर्पिर्मधुरौषधसिद्धं; तदेव सप्तमे मासे|

# Conti….

- अष्टमे तु मासे क्षीरयवागूं सर्पिष्मतीं काले काले पिबेत्; तन्नेति भद्रकाप्यः, पैङ्गल्याबाधो ह्यस्या गर्भमागच्छेदिति; अस्त्वत्रपैङ्गल्याबाध इत्याह भगवान् पुनर्वसुरात्रेयः, न त्वेवैतन्न कार्यम्; एवं कुर्वती ह्यरोगाऽऽरोग्यबलवर्णस्वरसंहननसम्पदुपेतंज्ञातीनामपि श्रेष्ठमपत्यं जनयति|
- नवमे तु खल्वेनां मासे मधुरौषधसिद्धेन तैलेनानुवासयेत्| अतश्चैवास्यास्तैलात् पिचुं योनौ प्रणयेद्गर्भस्थानमार्गस्नेहनार्थम्|

- तत्र गर्भस्य केशा जायमाना मातुर्विदाहं जनयन्तीति स्त्रियो भाषन्ते; तन्नेति भगवानात्रेयः, किन्तुगर्भोत्पीडनाद्वातपित्तश्लेष्माण उरः प्राप्य विदाहं जनयन्ति, ततः कण्डूरुपजायते, कण्डूमूला च **किक्किसावाप्तिर्भवति|**
- तत्र कोलोदकेन नवनीतस्य मधुरौषधसिद्धस्य पाणितलमात्रं काले कालेऽस्यै पानार्थं दद्यात्, चन्दनमृणालकल्कैश्चास्याःस्तनोदरं विमृद्गीयात्, शिरीषधातकीसर्षपमधुकचूर्णैर्वा, कुटजार्जकबीजमुस्तहरिद्राकल्कैर्वा,निम्बकोलसुरसमञ्जिष्ठाकल्कैर्वा, पृषतहरिणशशरुधिरयुतया त्रिफलया वा; करवीरपत्रसिद्धेन तैलेनाभ्यङ्गः; परिषेकःपुनर्मालतीमधुकसिद्धेनाम्भसा; जातकण्डूश्च कण्डूयनं वर्जयेत्त्वग्भेदवैरूप्यपरिहारार्थम्, असह्यायां तुकण्डवामुन्मर्दनोद्धर्षणाभ्यां परिहारः स्यात्; मधुरमाहारजातं वातहरमल्पमस्नेहलवणमल्पोदकानुपानं च भुञ्जीत|
- यद्दिदं कर्म प्रथमं मासं समुपादायोपदिष्टमानवमान्मासात्तेन गर्भिण्या गर्भसमये गर्भधारिणीकुक्षिकटीपार्श्वपृष्ठं मृदुभवति,वातश्चानुलोमः सम्पद्यते, मूत्रपुरीषे च प्रकृतिभूते सुखेन मार्गमनुपद्येते, चर्मनखानि च मार्दवमुपयान्ति, बलवर्णौचोपचीयेते; पुत्रं चेष्टं सम्पदुपेतं सुखिनं सुखेनैषा काले प्रजायत इति||३२||

# Infra structure of maternity home

- प्राक् चैवास्या नवमान्मासात् सूतिकागारं कारयेदपहृतास्थिशर्कराकपाले देशे प्रशस्तरूपरसगन्धायां भूमौ प्राग्द्वारमुदग्द्वारं वा बैल्वानां काष्ठानां तैन्दुकैङ्गुदकानां भाल्लातकानां वार(रु)णानां खादिराणां वा; यानि चान्यान्यपि ब्राह्मणाः शंसेयुरथर्ववेदविदस्तेषां; वसनालेपनाच्छादनापिधानसम्पदुपेतंवास्तुविद्याहृदययोगाग्निसलिलोदूखलवर्चःस्थानस्नानभूमिमहानसमृतुसुखं च||३३||
- Well before the ninth month of pregnancy, a maternity home should be constructed in a place that is free from bones, gravels and broken pieces of baked earthen utensils, the soil of which should have excellent color, taste and odour, the door of which should be facing the east or north and made of *bilwa* wood (Aeglemarmelos Corr.) or *tinduka* (Diospyrosperegrine Gurke), *ingudi* (Balanitesaegyptica Delile.), *bhallataka* (Semecarpusanacardium Linn.), *varuna* (Creteva religiosa) or *khadira* (Acaciacatechu willd.), or those woods recommended by *brahmins* who are well versed in Atharva Veda. The maternity home should be well built, spacious, well painted, have adequate doors and windows, well furnished with appliances, furnishings, water storage, lavatories, toiletries, etc. - built in accordance with the principles of *Vastuvidya* (science of architecture). The house should be comfortable for all seasons.

# Requirements in the maternity home

- तत्र सर्पिस्तैलमधुसैन्धवसौवर्चलकालविड्लवणविडङ्गकुष्ठकिलिमनागर-पिप्पलीपिप्पलीमूलहस्तिपिप्पलीमण्डूकपर्ण्येलालाङ्गलीवचाचव्यचित्रकचिरबिल्व-हिङ्गुसर्षपलशुनकतककणकणिकानीपातसीबल्वजभूर्जकुलत्थमैरेयसुरासवाः सन्निहिताः स्युः; तथाऽश्मानौ द्वौ, द्वे कु(च)ण्डमुसले, द्वे उदूखले, खरवृषभश्च , द्वौ च तीक्ष्णौ सूचीपिप्पलकौ सौवर्णराजतौ, शस्त्राणि च तीक्ष्णायसानि, द्वौ चबिल्वमयौ पर्यङ्कौ, तैन्दुकैङ्गुदानि च काष्ठान्यग्निसन्धुक्षणानि, स्त्रियश्च बह्व्यो बहुशः प्रजाताः सौहार्दयुक्ताःसततमनुरक्ताः प्रदक्षिणाचाराः प्रतिपत्तिकुशलाः प्रकृतिवत्सलास्त्यक्तविषादाः क्लेशसहिन्योऽभिमताः,ब्राह्मणाश्चाथर्ववेदविदः; यच्चान्यदपि तत्र समर्थं मन्येत, यच्चान्यच्च ब्राह्मणा ब्रूयुः स्त्रियश्च वृद्धास्तत् कार्यम्||३४||

# Premonitory signs and symptoms of labor

- तस्यास्तु खल्विमानि लिङ्गानि प्रजननकालमभितो भवन्ति; तद्यथा- क्लमो गात्राणां, ग्लानिराननस्य, अक्ष्णोः शैथिल्यं,विमुक्तबन्धनत्वमिव वक्षसः, कुक्षेरवस्रंसनम्, अधोगुरुत्वं, वङ्क्षणबस्तिकटीकुक्षिपार्श्वपृष्ठनिस्तोदः, योनेः प्रस्रवणम्,अनन्नाभिलाषश्चेति; ततोऽनन्तरमावीनां प्रादुर्भावः, प्रसेकश्च गर्भोदकस्य||३६||
- The premonitory signs and symptoms of labor include tiredness, pallor, laxity of eyes (drooping of eyelids), feeling of getting freed from constrictions around the chest, bearing down pressure sensation in pelvis because of fetus, heaviness of lower abdomen, and pain in the groin, bladder area perineum, pelvis, belly, sides and the back, discharge from the vagina, lack of desire for food. These are typically followed by the appearance of *garbhodaka* (amniotic fluid) and initiation of *aavee* (labor pain).

# Commencement of *aavee* (labor)

- **आवी**प्रादुर्भावे तु भूमौ शयनं विदध्यान्मृद्वास्तरणोपपन्नम्|
  तदध्यासीत सा|
  तां ततः समन्ततः परिवार्य यथोक्तगुणाः स्त्रियः
  पर्युपासीरन्नाश्वासयन्त्यो वाग्भिर्ग्राहिणीयाभिः [३]
  सान्त्वनीयाभिश्च||३७||

- With the commencement of ***aavee***, the parturient woman should be made to sit on a bed prepared with soft materials spread over the ground. Then, the female attendants with qualities mentioned in the preceding verses should surround her from all sides and encourage her by comforting words and touch

# Pranapratyagaman

- तस्यास्तु खल्वपरायाः प्रपतनार्थे कर्मणि क्रियमाणे जातमात्रस्यैव कुमारस्य कार्याण्येतानि कर्माणि भवन्ति; तदयथा-अश्मनोः सङ्घट्टनं कर्णयोर्मूले, शीतोदकेनोष्णोदकेन वा मुखपरिषेकः, तथा स क्लेशविहतान् प्राणान् पुनर्लभेत| कृष्णकपालिकाशूर्पेण चैनमभिनिष्पुणीयुर्यद्येचैष्टः स्याद् यावत् प्राणानां प्रत्यागमनम् (तत्तत् सर्वमेव कार्यम)| ततः प्रेत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत्||४२||

- While administering the various procedures described in the preceding verse to remove the placenta from the mother's body, certain measures should also be performed on the newly born child, such as gently striking the stones near the root of the ear, and sprinkling of cold or hot water over its face, to rejuvenate its vital breath that might have stopped due to distress. If the child is not movingor does not revive, it should then be fanned with a winnowing basket made of bamboo etc. till it regains consciousness (the procedures to be continued till consciousness is established). Once respiration is established and gets normalized, then he should be given a good bath and cleansed thoroughly.

# Procedure for cleaning the baby after birth

- अथास्य ताल्वोष्ठकण्ठजिह्वाप्रमार्जनमारभेताङ्गुल्या सुपरिलिखितनखया सुप्रक्षालितोपधानकार्पाससपिचुमत्या|
  प्रथमं प्रमार्जितास्यस्य चास्य शिरस्तालु कार्पासपिचुना स्नेहगर्भेण प्रतिसञ्छादयेत्|
  ततोऽस्यानन्तरं सैन्धवोपहितेन सर्पिषा कार्यं प्रच्छर्दनम्||४३||

- Thereafter, the palate, lips, throat and tongue of the child should be cleaned with a clean cotton swab using a finger of the attendant, whose nails have been well manicured. After cleaning the mouth, a cotton swab well soaked in oil should be placed over the *shirastalu* (anterior fontanel) and then a procedure to provoke vomiting should be administered using ghee with *saindhava* (rock salt).

# Measuring the umbilical cord

- ततः कल्पनं नाड्याः|
  अतस्तस्याः कल्पनविधिमुपदेक्ष्यामः-नाभिबन्धनात् **प्रभृत्यष्टाङ्गुलमभिज्ञानं** कृत्वा छेदनावकाशस्य दवयोरन्तरयोःशनैर्गृहीत्वा तीक्ष्णेन रौक्मराजतायसानां छेदनानामन्यतमेनार्धधारिण [१] छेदयेत्|
  तामग्रे सूत्रेणोपनिर्बध्य कण्ठेऽस्य शिथिलमवसृजेत्|
  तस्य चेन्नाभिः पच्येत, तां **लोध्रमधुकप्रियङ्गुसुरदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यज्यात्**, एषामेव **तैलौषधानांचूर्णेनावचूर्णयेत्|**
  इति नाडीकल्पनविधिरुक्तः सम्यक्||४४||

- Thereafter, the umbilical cord is measured. The cord should be marked at a distance of eight angula (thumb-length) from its base where it is attached at the navel of the child, and then holding the cord gently and firmly on both the ends, it should be cut with a sharp half-edged instrument made of gold, silver or iron (steel). The portion of the cord at the navel side should be tied with a thread and then loosely tied to the neck of the child. If the umbilicus end gets suppurated, then it should be anointed with oil prepared with paste of *lodhra* (Symplocos racemosa Roxb.), *madhuka* (Glycyrrhiza glabra Linn.), *priyangu* (Callicarpa macrophylla Vahl.), *devadaru* (Cedrus deodara Loud.) and *haridra* (Curcuma longa Linn.), and the powder of the same drugs should be sprinkled over the cut surface. This concludes the verse on the "measurement of the cord"

# Birth-rites per Vedic rituals

- अतोऽनन्तरं जातकर्म कुमारस्य कार्यम्|
  तद्यथा- मधुसर्पिषी मन्त्रोपमन्त्रिते यथाम्नायं प्रथमं प्राशितुं दद्यात्|
  स्तनमत ऊर्ध्वमेतेनैव विधिना दक्षिणं पातुं पुरस्तात् प्रयच्छेत्|
  अथातः [१] शीर्षतः स्थापयेदुदकुम्भं मन्त्रोपमन्त्रितम्||४६||

# Qualities of the ideal breastmilk

- स्तन्यसम्पत्तु प्रकृतिवर्णगन्धरसस्पर्शम्, उदपात्रे च दुह्यमानमुदकं व्येति प्रकृतिभूतत्वात्; तत् पुष्टिकरमारोग्यकरं चेति(स्तन्यसम्पत्)||५४||
- Ideal breast milk for the baby has properties such as natural color, smell, taste and touch and when poured into a pot of water, it should mix at once perfectly with the water. Such milk is nourishing and health giving to the child

# Conti…

- अतोऽन्यथा व्यापन्नं ज्ञेयम्|
  तस्य विशेषाः श्यावारुणवर्णं कषायानुरसं विशदमनालक्ष्यगन्धं रूक्षं द्रवं फेनिलं
  लघ्वतृप्तिकर कर्शन वातविकाराणा कर्तृ वातोपसृष्ट क्षीरमभिज्ञेय ;
  कृष्णनीलपीतताम्रावभास तिक्ताम्लकटुकानुरस कुणपरुधिरगन्धि भृशोष्णं पित्तविकाराणां
  कर्तृ च पित्तोपसृष्ट क्षीरमभिज्ञेयम्, अत्यर्थशुक्लमतिमाधुर्योपपन्न लवणानुरस
  घृततैलवसामज्जगन्धि पिच्छिलतन्तुमदुदकपात्रेऽवसीदच्छ्लेष्मविकाराणां कर्तृ श्लेष्मोपसृष्टं
  क्षीरमभिज्ञेयम्||५५||

- The breast milk which does not fit the above description is to considered vitiated and unfit for the child's consumption. Milk that assumes a darkish or reddish hue, astringent in after-taste, clear, of no marked smell, dry, watery, frothy and light in texture or form, and is not satisfying causes emaciation, gives rise to vatika disorders, and thus, should be considered vata-vitiated. Milk that looks blackish, bluish, yellow, or coppery, has an after-taste which is sour or pungent, which smells like a corpse or like blood, and which is very warm is pitta-vitiated and could cause pittaja disorders. Finally, the milk that is very white, very sweet with a saltish after-taste, that has odour like ghee, oil, flesh-marrow or bone-marrow, is viscid, thready and sinks in water without mixing, gives rise to disorders of kapha and should be considered as kapha-vitiated milk.

# Lactation-stimulants (or galactogogues)

- Expandक्षीरज़ननानि तु मदयानि सीधुवर्ज्यानि, ग्राम्यानूपौदकानि च शाकधान्यमांसानि, द्रवमधुराम्ललवणभूयिष्ठाश्चाहाराः,क्षीरिण्यश्चौषधयः, क्षीरपानमनायासश्च, वीरणषष्टिकशालीक्षुवालिकादर्भकुशकाशगुन्द्रेत्कटमूलकषायाणां च पानमिति(क्षीरजननानि)||५७||
- Galactogogues (lactation-stimulants) include the following food articles and habits: all wines with the exception of sidhu, vegetables, cereals and meat of domestic, marshy and aquatic origins; food articles and liquids that have predominantly sweet, sour or salty taste; herbs containing milky juices; cow’s milk; avoidance of laborious tasks, and; drinking of the decoctions of roots of virana (Vetiveria zizanoides Nash.), shashtika (a variety of shali – Oryza sativa Linn.), shali (Oryza sativa Linn.), ikshuvalika (Astercantha longifolia Nees.), darbha (Desmostachya bipinnata Stapf), kusha (Desmostachya bipinnata Stapf), kasha (Saccharum spontaneum Linn.), gundra (Saccharum sara)and Itkata (-?-)(are galactogogues).

# THANK YOU